**समर्थ** त्रि० सम्+अर्थ-अच् । १शक्ते २हिते च अमरः । सम्यगर्थः प्रा० स० । ३प्रशस्ताभीष्टे पु० । सङ्गतोऽर्थो यस्य प्रा०स० । "समर्थः पदविधिः" पा० परिभाषिते सङ्गतार्थे समसादौ समासशब्दे दृश्यम् ।

**समर्थन** न० सम्+अर्थ-ल्युट् । इदमित्थमेवेति निश्चयहेतूपन्यासेन निश्चायकव्यापारभेदे अमरः । युच् । तत्र, अशक्येऽध्यवसाये च स्त्री । [तारि देवादौ अमरः ।

**समर्द्धक** त्रि० समर्द्धयति सम्+ऋध-ण्वुल् । इष्टफलदा-

**समर्य्याद** त्रि० सह मर्य्यादया सहस्य सः । १सीमायुते २समीपे पु० मेदि० ।

**समल** न० सम्यक् मलम् । १विष्ठायां शब्दच० । सह मलेन सहस्य सः । २कलुषे त्रि० त्रिका० । [वतरणसोपाने ।

**समवतार** पु० समवतीर्य्यतेऽनेन सम्+अव+तॄ-घञ् । जला-

**समवर्त्तिन्** पु० समं वर्त्तते वृत-णिनि । १यमे धर्मराजे अमरः । २सर्वत्र समभावेन वर्त्तिनि त्रि० ।

**समवकार** पु० सम्+अव+कॄ-आधारे घञ् । नाटकभेदे सा०द० उक्तो यथा

"वृत्तं समवकारे तु ख्यातं देवासुराश्रयम् । सन्धयो निर्विमर्षास्तु त्रयोऽङ्कास्तत्र चादिमे । सन्धी द्वावन्त्ययोस्तद्वदेक एको भवेत् पुनः । नायका द्वादशोदात्ताः प्रख्याता देवदानवाः । फलं पृथक् पृथक् तेषां वीरमुख्योऽखिलो रसः । वृत्तयो मन्दकैशिक्यो नात्र विन्दुप्रवेशकौ । वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश । गायत्र्युष्णिङ्मुखान्यत्र छन्दांसि विविधानि च । त्रिःशृङ्गारस्त्रिकपटः कार्य्यश्चायं त्रिविद्रवः । वस्तु द्वादशनाडीभिर्निष्पाद्यं प्रथमाङ्गगम् । द्वितीयेऽङ्के च तिसृभिर्द्वाभ्यामङ्के तृतीयके" । नाडिका घटिकाद्वयमुच्यते । विन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ । तत्र धर्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः । स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः । अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः" । तत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः अर्थलाभार्थकल्पितः अर्थशृङ्गारः । प्रहसनशृङ्गारः कामशृङ्गारः । तत्र कामशृङ्गारः प्रथमाङ्क एव । अन्ययोस्तु न नियम इत्याहुः । चेतनाचेतना गजादयः । समवकीर्य्यन्ते बहवोऽर्था अस्मिन्निति समवकारः । यथा समुद्रमन्थनम्" ।

**समवाय** पु० सम्+अव-इण-अच् । १समूहे अमरः २मेलने न्यायोक्ते नित्यद्रव्यादिषु जात्यादीनां ३संबन्धभेदे च "घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः । तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" भाषा० "समवायं दर्शयति । घटादीनामिति अवयवावयविनोः जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः, समवायत्वं नित्यसम्बन्धत्वं तत्र प्रमाणन्तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् इत्यनुमाने संयोगादिबाधात् समवायसिद्धिः । न च स्वरूपसम्बन्धेन सिद्धसाधनम् अर्थान्तरं वा, अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः । न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः तत्र रूपसमवायसत्त्वेऽपि रूपाभावात् । न चैवम् अभावस्य वैशिष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यं तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावसम्बन्धस्य तत्र सत्त्वात् तस्य नित्यत्वात् अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात्, मम तु मते घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः । वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तत्रैव गौरवम् इत्यञ्च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः" । अयुतसिद्धयोः सम्बन्धः स इति वैशेषिकाः स च सम्बन्धो नाना नित्यश्चेति नव्यनैयायिकाः प्राभाकराश्चाहुः । समवायस्य प्रत्यक्षः "प्रत्यक्षं समवायस्य विशेषणतया भवेत्" भाषा० । अतीन्द्रियोऽनुमेयश्चेति वैशेषिकाः, स्वरूपस्यैव सम्बन्धत्वोपपत्तेः समवायो न पदार्थान्तरमिति भाट्टाः ।

**समवायिजनक** न० कारणभेदे "यत् समवेतं कार्य्यं भवति ज्ञेयं तु समवायिजनकं तत्" "समवायिकारणत्वं द्रव्यस्यैव विज्ञेयम्" भाषा० । इदमेव उपादानकारणमिति साङ्ख्यावेदान्तिनश्चाहुः ।

**समवायिन्** त्रि० समवायोऽस्त्यस्य । समवायसम्बन्धानुयोगिनि यथा घटादीनां कपालादि गुणक्रिययोर्द्रव्याणि ।

**समवेत** त्रि० सम्+अव-इण-क्त । १मिलिते २समूहान्विते न्यायोक्तेन समवायसम्बन्धेन ३स्थिते च ।

**समशनीय** पु० सम्यगशनाय हितं छ । विवाहोत्तरं दम्पत्योः सम्यगशनाय विहिते स्थालीपाके" तद्विधानादि सं० त० गोभिलोक्तं यथा "श्वोभूते वा समशनीयं स्थालीपाकं कुर्वीत" "यदि विवाहे यज्ञादिना महानिशा भूता तदा तत्परदिने सम्यगशनार्थं क्रियते इति सम्यगशनीयं स्थालीपाकं कुर्वीत" रघु० । तद्धोमविधानादि तत्र दृश्यम् ।